अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BV-204**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : द्वितीयम्)**
**चतुर्थपत्रम् – वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : इदं प्रश्नपत्रं सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (खण्ड – क)
## (वेदः वागाम्भृणी, नासदीयसूक्तम्) 20 अङ्काः

**प्रश्नः1– वागाम्भृणीनासदीयसूक्तयोः स्मृता द्वौ मन्त्रौ लेखनीयौ –** **(2.5X2=05)**

**प्रश्नः2– चतुर्णां मन्त्राणां शब्दार्थपुरस्सरं स्वशब्दैरर्थबोधनम् –** **(10)**

(क) अहं राष्ट्री संगमनीवसूनां चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः परुत्रा भूरिस्थात्रां भूर्यविशयन्तीम्।।

(ख) नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।।

(ग) अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्।।

(घ) न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्यकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास।।

(ङ) को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेदयत आबभूव।।

**प्रश्नः3– निम्नलिखिताना मन्त्राणाम् ऋषिदेवताछन्दोज्ञापनं कुर्वन्तु –** **(05)**

(क) अहं रुद्रेभिर्वसुभि. ............................................................ नोभा।

(ख) कामस्तदग्रे समवर्त्तताधि. ............................................ मनीषा।।

## (खण्ड – ख)
## (योगदर्शनम् = तृतीयचतुर्थपादौ) 15 अङ्काः

**प्रश्नः4– पृष्टात् सूत्रादग्रे पञ्च सूत्राणि लेखनीयानि –** **(05)**

(क) प्रत्ययस्य परचित्तज्ञानम्।
(ख) जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः।

**प्रश्नः5– पृष्टानां पञ्चानां सूत्राणामर्थं बोधयन्तु –** **(05)**

(क) प्रतिभाद् वा सर्वम्। (ख) तत्र प्रत्ययैकतानता ध्यानम्।
(ग) भुवनज्ञानं सूर्ये संयमात्। (घ) ततः क्लेशकर्मनिवृत्तिः।
(ङ) ते व्यक्तसूक्ष्मा गुणात्मानः।

**प्रश्नः6– द्वयोर् विषयात्मकयोः समाधान क्रियताम् –** **(05)**

(क) कैवल्यमिति किम्? (ख) कर्मणां प्रकाराः लिख्यन्ताम्।
(ग) इन्द्रियजयात् किं भवति?

## (खण्ड – ग)
## (केनोपनिषद्) 15 अङ्काः

**प्रश्नः7– पृष्टानां पञ्चानां मन्त्राणां पूर्तिः करणीया –** **(05)**

(क) इह चेदवेदीदथ. ...............................।। (ख) श्रोत्रस्य श्रोत्रं मनसा. ...................।।
(ग) ....... नो मनो न विद्मो. ........ ।। (घ) ............ श्रात्रमिदं श्रुतम्. .................।।
(ङ) ................................. मन्ये विदितम्।। (च) प्रतिबोधविदितं. ..................................।।

**प्रश्नः8– द्वयोर्भावं बोधयन्तु ......................................................................** **(10)**

(क) केनोपनिषदि कस्य विषये चर्चास्ति? सविस्तारं लिखन्तु ।

............ ***अथवा*** ........

"यस्यामतं तस्य मतं" इति श्रुतेः व्याख्यां करोतु।

(ख) तृतीयखण्डस्य भावसारं लिखन्तु।

(ग) "तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम्" अस्य कोऽभिप्रायः? लिख्यताम्।

## (खण्ड – घ)
## (श्रीमद्भगवद्गीता) 20 अङ्काः

**प्रश्नः9– पृष्टानां पञ्चानां श्लोकानां पूर्तिः कार्या –** **(10)**

(क) यस्मान्नोद्विजते. ...................।। (ख) ..................... मे प्रियो नरः।।
(ग) क्लेशो. ..................................।। (घ) ये त्वक्षरम् . .......................।।
(ङ) ......................... यतात्मवान्।। (च) ............................ धनञ्जय।।

**प्रश्नः10– पृष्टानां द्वयोः पदच्छेदविभक्तिसहितमर्थं लिखन्तु।** **(10)**

(क) अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।

(ख) समः शत्रौ च मित्र च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।

(ग) श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्।।

---------------x---------------